Impact Factor : 6.125

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 8 | Vol. 16, Part-I | July-December, 2022

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

- **असहयोग आंदोलन एवं गांधी जी** 189–189
  *डॉ० कंचन कुमारी*
- **स्वामी दयानन्द सरस्वती की दार्शनिक अवधारणा–एक विवेचन** 190–191
  *डॉ० मनोज कुमार मिश्र*
- **जैन दर्शन में दुःख का सम्प्रत्यय** 192–193
  *डॉ० शालिनी कुमारी*
- **बौद्ध दर्शन का डॉ० भीमराव अम्बेडकर पर प्रभाव** 194–197
  *शैलेश कुमार*
- **श्रीमद्भगवद्गीता में समष्टिगत नैतिक मूल्य का स्वरुप** 198–201
  *राहुल कृष्ण*
- **आल्हागाथा की शैली** 202–204
  *प्रो० किंशुक श्रीवास्तव व डॉ० वन्दना शर्मा व आरती शर्मा*
- **हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्** 205–208
  *सुधीरप्रसादनौटियालः*
- **रघुवंशमहाकाव्ये शिक्षाक्रमः** 209–210
  *डॉ० ए. सच्चिदानन्दमूर्त्तिः*
- **E- Waste Awareness to Maintain Environment in India** 211-214
  *Dr. Vikas Kumar*
- **BUDDHISIM AND ITS RELATION TO CHINESE RELIGIONS** 215-217
  *Dr. Biswarup Mandal*
- **Concept of Root and Conjugation sign in the Pāli Grammar** 218-223
  *Rekha K. Badole*
- **Postures and Impressions of the Buddha Statues in Sri Lanka** 224-226
  *Sakura Asangika Senaviratna*


❖

# हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्

• सुधीरप्रसादनौटियालः

**सूत्रपरिचयः –** भगवता पतञ्जलिना व्याकरणपदार्थत्वं सूत्रमात्रस्यापि सिद्धान्तितम्। सूत्रञ्च अल्पाक्षरम्, असन्दिग्धं सारवद् विश्वतोमुखम् – अनेकरूपेणव्याख्यायोग्यम्, अस्तोभम्, अनवद्यम्- सर्वदोषरहितमेव भवति। शिष्टैः सूत्रस्वरूपमित्थमेव प्रदर्शितम्।[1] सूत्रमिदं संज्ञापरिभाषाविधिनियम-अतिदेश-अधिकारभेदेन षड्विधम्। तथोक्तम् -

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।[2]**

अत्र श्लोके 'षड्विधं सूत्रलक्षणम्' इत्युक्तं वर्तते तर्हि नायं सूत्रभेदबोधकः इति तु न चिन्तनीयं यतोहि अत्र समागतः लक्षणशब्दः न असाधारणधर्मपरः अपितु 'लक्ष्यते ज्ञायते यत्तल्लक्षणम्' इति व्युत्पत्त्या स्वरूपपरोऽस्ति।[3] **'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' (6.1.68)** इति सूत्रं षड्विधेषु सूत्रेषु विधिसूत्रमस्ति। 'विधित्वन्नाम पुण्यजनकतावच्छेदकसाधुत्वज्ञानजनकत्वम्'।[4] विधिसूत्रेषु अन्यतमं 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रम् अष्टाध्याय्यां षष्ठाध्याये प्रथमे पादे तथा सिद्धान्तकौमुद्यां अजन्तपुल्लिङ्गप्रकरणे वर्तते।

**पदच्छेदः सूत्रार्थश्च -** अत्र सूत्रे बहूनि पदानि सन्ति , तत्र हल्ङ्याब्भ्यः पञ्चम्यन्तं पदम् , तस्य हल् च ङीप् च आप् च एतेभ्यः हल्ङ्याब्भ्यः इति इतरेतरयोगद्वन्द्वसमासान्वाख्यानम्, दीर्घात् इति पञ्चम्यन्तं पदम् ङ्यापोरेव विशेषणं न तु हलि, एवञ्च सुतिसि इत्येतत् प्रत्ययबोधकं यत्पदं तत्तु तदादि उपस्थापकं ततो तद्विशेष्यकतदन्तविधिः। एवं ङीप् आप् इति प्रत्ययौ तदादिबोधकौ तत्रापि तदन्तोपस्थापयतः। एवञ्चात्र वाक्यार्थद्वयं भवति। तथाहि -

1. **"हलन्तात् परं सुतिसि इत्येतत् अपृक्तं हल् लुप्यते इत्येकः वाक्यार्थः"।**
2. **किञ्च "ङ्यन्त- आबन्तयोः यः तदादिः तदन्तश्च तदादिः तस्मात् परं सुतिसि इत्येतत् अपृक्तं हल् लुप्यते इति द्वितीयो वाक्यार्थः"** ।

विविधव्याख्यासु सूत्रस्यास्य वृत्तयः –

1. 'हलन्ताद्, ङ्यन्तादाबन्ताच्च दीर्घात् परं सुतिति इत्येतदपृक्तं हल् लुप्यते'[5] इति काशिकावृत्तिः।
2. 'हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येदपृक्तं हल् लुप्यते'[6] इति सिद्धान्तकौमुदी।
3. 'हलन्तान्तपरं दीर्घौ यो ङ्यापौ तदन्ताच्च परं सुतिसीत्येदपृक्तं हल् लुप्यते'[7] इति लघुसिद्धान्तकौमुदी।
4. 'हलन्तान्तपरं दीर्घौ यो ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते'[8] सारसिद्धान्तकौमुदी।
5. 'हलन्तात् ङ्यन्तादाब्न्ताद्दीर्घात् परं सुतिति इत्येतदपृक्तं हल् लुप्यते'[9] इति प्रक्रियाकौमुदी।
6. 'एभ्यः सुतिप्सिपामपृक्तस्य हलो लोपः स्यात्'[10] इति भाषावृत्तिः।

**उदाहरणम् –**

1. अस्य वाक्यार्थद्वयम् इति पूर्वमेव प्रतिपादितम्। तत्र प्रथमस्य **"हलन्तात् परं सुतिसि इत्येतत् अपृक्तं हल् लुप्यते"** इत्येतस्य अर्थस्य उदाहरणन्तु सखा राजा इति । अत्र 'सखान्- स्' 'राजान्- स्' इत्यवस्थायाञ्च हलन्तात् नकारात् परं 'सु' इत्येतत् अपृक्तं हल् 'स्' इति लुप्यते। ततः 'नलोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारस्य लोपे सखा राजा इति सिद्ध्यति। राजन्-शब्दात् प्रथमैकवचने सुप्रत्यये कृते, अनुबन्धलोपे च 'राजन्-स्' इत्यवस्थायाम् अनेन सूत्रेण हलन्तात् 'राजन्-घटकनकारात् परस्य 'सु'इत्यस्य अपृक्तसकारस्य लोपो भवति।
2. "ङ्यन्त-आबन्तयोः यः तदादिः तदन्तश्च तदादिः तस्मात् परं सुतिसि इत्येतत् अपृक्तं हल् लुप्यते इति द्वितीयो वाक्यार्थः"। **'ङ्यन्त- आबन्तयोः यः तदादिः तदन्तश्च तदादिः तस्मात् परं सुतिसि इत्येतत् अपृक्तं हल् लुप्यते'** इति द्वितीयस्य वाक्यार्थस्य उदाहरणन्तु बहुश्रेयसी।

---

• **शोधच्छात्रः, व्याकरणविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी**

**लोपशब्दार्थः –** अत्र शास्त्रीयः भावसाधनः लोपशब्दार्थः ( दर्शनाभावः ) स्वीकर्त्तव्यः आहोस्वित् लुप्यते इति लोपः इति कर्मव्युत्पत्या लुप्यमान् वर्णबोधकः लौकिकः लोपशब्दः इति जिज्ञासा भवति। सूत्रेऽस्मिन् 'लोपो व्योर्वलि' ( 6.1.66 ) इति सूत्रात् 'लोप' इति पदम् अनुवर्तते। यद्यत्र अनुवर्तमानं लोपपदं शास्त्रीयेणार्थेनैव अर्थवत् स्यात्तदा तेन लोपपदेन सूत्रघटकस्य द्वितीय-'हल्'पदस्य प्रथमान्तस्य सामानाधिकरण्येन सम्बन्धो नैव घटते। अत एव अत्र लौकिकः लोपशब्दार्थः स्वीकार्य्यः। प्रतिपादितञ्चैतत् काशिकायाम् – " 'लोपः' इति वर्तते। तदिह लौकिकेनार्थेनार्थवत् कर्मसाधनं द्रष्टव्यम्- लुप्यते इति लोपः"[11]। कर्मसाधनेन लौकिकेनार्थेनार्थवता लोपशब्देन 'हल्' इत्येतस्य पदस्य विशेषणविशेष्यभावः उपपन्नो भवति। लौकिकः लोपशब्दः लुप्यमानवर्णमात्रबोधकोऽस्ति।

**पदमञ्जरीकारमतम् –** शास्त्रीयेऽपि लोपशब्दे न दोषः इति पदमञ्जरीकारः हरदत्तः। तेन स्वमतम् 'अपर आह' इत्यादिना इत्थं प्रदर्शितम् - **" अपर आह – 'हल्ङ्याभ्यः' इति पञ्चम्या सुतिसीत्यादिकायाः प्रथमायाः षष्ठ्यां प्रकल्पितायां शास्त्रीयेऽपि लोपशब्दे न दोषः इति।**[12] अनेन पदमञ्जरीग्रन्थेन ज्ञायते यत् हरदत्तः शास्त्रीयः भावसाधनः लोपशब्दः अत्र स्वीकरोति। तेन वृत्तिकारमतं तिरस्कृतम्।

**विहितविशेषणम् आवश्यकं न वा** 'हलन्ताद्, ङ्यन्तादाबन्ताच्च दीर्घात् परं सुतिति इत्येतदपृक्तं हल् लुप्यते' इत्यर्थः स्वीकृतः काशिकायाम्। अत्र विहितविशेषणसन्दर्भे पदमञ्जरीकारो वदति - **ननु च विहितविशेषणं विज्ञायते– ङ्याबन्ताद्विविहितस्येति ? नैवं शक्यम् ; 'या, सा, का' इत्यादौ न स्यात् , न ह्यत्र टाबन्तात् सुब्विहितः । मा भूदेवम् , हलन्ताद्विहित इत्येवं भविष्यति । यद्येवम्—'यः, सः, कः' इत्यत्रापि स्यात् , 'कर्ता, हर्ता' इत्यादौ च न स्यात् , न ह्यत्र हलन्तात् सुर्विहित इति ? अतोऽन्यस्मादपि विहितस्य हल्ङ्याब्भ्योऽनन्तरस्य लोप इत्यास्थेयम्** [13]।

इत्थं ज्ञायते यद् पदमञ्जरीकारः सूत्रार्थेऽस्मिन् 'विहितविशेषणम्' न स्वीकरोति। अत्र विषये प्रौढमनोरमायां दीक्षितोऽपि पदमञ्जकारम् अनुकरोति। तथाहि -

अत्र सन्दर्भे श्रीमता दीक्षितेन आशङ्कितं स्वीयं सिद्धान्तकौमुदीयं मूलमाश्रित्य यत् – कथं हलन्तात्परमुच्यते ? हलन्तात् विहितमिति उच्यताम्। एवं च उत्तरितं यः, सः कः इत्यादिषु सुलोपः न स्यात् , हलन्तात् विहितत्त्वाभावात् । यदि परविशेषणमुच्यते तदा या सा इत्यादौ दोषः स्यात्। तस्मात् उभयत्र दोषमाशङ्क्य हलन्तात्परमिति पक्षः सिद्धान्तितः।

**प्रथमहल्ग्रहणस्य प्रयोजनम् -** अत्र विषये अस्माभिः आशङ्क्यते यद् एतस्मिन् सूत्रे हल्पदं वारद्वयं पठितं तत्र प्रथमहल्ग्रहणं मास्तु , द्वितीयमेव हल्ग्रहणमस्तु तदा को दोषः ? इति अस्माकम् आक्षेपः। यदि उच्यते राजा , सखा , इत्यादौ सुलोपः न स्यात् तदा राजा सखा इत्यादिप्रयोगाणाम् असिद्धिः स्यात् तस्मात् प्रथमहल्ग्रहणं करणीयमिति चेत् न, यतोहि 'राजान् स्' इत्यवस्थायाम् सकारस्य संयोगान्तलोपसम्भवात् नलोपः प्रातिपदिकान्तस्य (8.2.7 ) इति नकारलोपकरणात् राजा सखा इत्यादिप्रयोगसिद्धौ सत्याम् हल्ग्रहणं पुनरपि व्यर्थमिति।

अत्रोच्यते - 'राजान् स्' इत्यत्र सकरस्य संयोगान्तलोपे सत्यपि **'नलोपः प्रातिपदिकान्तस्य' (**8.2.7**)** इति सूत्रेण नकारलोपस्तु दुर्लभः , नलोपे संयोगान्तलोपस्य असिद्धत्वात्। तस्मात् प्रथमहल्ग्रहणमवश्यं करणीयम् अतएव दीक्षितो वदति–

**संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति ।**
**रात्तु तेनैव लोपः हलस्तस्माद्विधीयते।।**[14]

अत्र पुनरुच्यते यदि नलोपे संयोगान्तलोपस्य असिद्धत्वात् राजा सखा इत्यादौ नलोपकरणाय यत् प्रथमहल्ग्रहणस्य प्रयोजनमुच्यते तदपि न युक्तम्। यतोहि अस्माभिः ज्ञायते 'नलोपे संयोगान्तलोपः नासिद्धः' इति। यदि नलोपे संयोगान्तलोपः असिद्धः स्यात्तदा **'न ङिसम्बुद्ध्योः' (8.1.24 )** इति सूत्रस्थं सम्बुद्धिग्रहणं व्यर्थं स्यात् । तथाहि 'हे राजन्' इत्यत्र नलोपनिषेधाय सम्बुद्धिग्रहणं नावश्यकम्। किन्तु नलोपे संयोगान्तलोपासिद्धौ नलोपः न प्राप्तः। तस्मात् तद्वारणाय कृतं यद् सम्बुद्धिग्रहणं तद् व्यर्थम्, तस्मात् प्रथमहल्ग्रहणं व्यर्थमेव ।

**अत्रेदं बोध्यम् -** यदि नलोपे संयोगान्तलोपः नासिद्धः इति ज्ञाप्यते तदा गोमान् इत्यादौ नलोपापत्तिः । तस्मात् ज्ञापनं दुश्शकमेव। एवञ्च सखा राजा इत्यादिप्रयोगसिद्ध्ये प्रथमहल्ग्रहणम् आवश्यकमिति भावः। यदि ज्ञापकस्य विशेषविषयत्वं स्वीक्रियते तदा प्रथमहल्ग्रहणं व्यर्थमेव।

**अपृक्तम् इति पदस्य औचित्यम् –** 'अपृक्तम्' इति पदस्य किं प्रयोजनमिति जिज्ञासयाम् उक्तं विद्यते सिद्धान्तकौमुद्याम् – "अपृक्तम् इति किम्। बिभर्ति"[15] । अत्र बिभर्ति इत्यत्र ति-घटकस्य तकारस्य हल्त्वमस्ति परन्तु तस्य अपृक्तत्वन्नास्ति। 'अपृक्तम्' इति पदाभावे तस्यापि लोपः स्यात्। अत्र बालमनोरमाकारः प्रत्युदाहरणमिदं न सहते। तथाहि – "वस्तुतस्तु उकारे इकारे च लुप्ते परिशिष्टः सकारस्तकारश्च सुतिसीत्यनेन गृह्यते, हल्शब्दसामानाधिकरण्यादित्युक्तम्। नात्र इकारलोपोऽस्ति। अतो हल्ग्रहणेनैव बिभर्त्तीत्यत्र लोपाऽभावसिद्धेरपृक्तग्रहणस्य नेदं प्रत्युदाहरणम्"[16] ।

**निष्कर्षः –** सूत्रेऽस्मिन् महान् विचारो वर्तते। सूत्रस्य यानि उदाहरणानि काशिकाकारेण प्रदर्शितानि प्रायः तान्येव सिद्धान्तकौमुदीकारेण श्रीमद्भट्टोजिदीक्षितेनापि अनुकृतानि। 'संयोगान्तस्य लोपे हि... इयं कारिका काशिकायां वर्तते, भट्टोजिदीक्षितेन इयं कारिका प्रौढमनोरमायां प्रदर्शिता।

सूत्रेऽस्मिन् लोपशब्दस्य लौकिकः अर्थः स्वीकरणीयः इति काशिकारः, शास्त्रीयः इति पदमञ्जरीकारः। अत्र हरदत्तस्य विचार एव उचितोऽस्ति। हलन्ताद्विहितम् इत्यादिरीत्या अत्र विहितविशेषणं नोचितम् इति प्रतिपादितम् हरदत्तेन तथैव प्रौढमनोरमायां दीक्षितोऽपि अनुससार। अनेन तत्र हरदत्तप्रभावः परिलक्ष्यते।

अपृक्तम् इति पदस्य दीक्षितप्रदर्शितम् बिभर्त्तीति प्रत्युदाहरणं बालमनोरमाकारेण तिरस्कृतम्। एतत्तु सम्यगेव।

**सन्दर्भ -**

**1.** अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥- वायुपुराणम्, 59/142, पृ. 488
**2.** लघुशब्देन्दुशेखरः, अभिनवचन्द्रिकाटीका, संज्ञाप्रकरणम्, पृ. 23
**3.** द्रष्टव्यम् – व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः, पृ. 08
**4.** व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः, पृ. 09
**5.** काशिकावृत्तिः, पृ. 98
**6.** सिद्धान्तकौमुदी, पृ. 248
**7.** लघुसिद्धान्तकौमुदी, पृ. 44
**8.** सारसिद्धान्तकौमुदी, पृ. 48
**9.** प्रक्रियाकौमुदी, पृ. 155
**10.** भाषावृत्तिः, पृ. 385
**11.** काशिकावृत्तिः, पृ. 98
**12.** पदमञ्जरी, पृ. 212
**13.** पदमञ्जरी, पृ. 212
**14.** प्रौढमनोरमा, अजन्तपुल्लिङ्गप्रकरणम्, पृ. 233
**15.** सिद्धान्तकौमुदी, पृ. 249
**16.** बालमनोरमा, पृ. 250

**सन्दर्भग्रन्थसूची –**

1. **अष्टाध्यायी,** पाणिनिविरचिता, सम्पा०- डॉ० रमाशङ्करमिश्रः, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रितं संस्करणम्, २०१७
2. **काशिकावृत्तिः, (सप्तमो भागः),** वामनजयादित्यविरचिता, सम्पा०- जयशङ्करलालत्रिपाठी, तारा बुक एजेन्सी, वाराणसी, प्रथमं संस्करणम्, १९९०
3. **पदमञ्जरी, (द्वितीयो भागः),** हरदत्तमिश्रप्रणीता, संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद्, प्रथमं संस्करणम्, १९८१

4. **प्रक्रियाकौमुदी,** रामचन्द्राचार्यप्रणीता, संशोधकः- कमलाशङ्करः, भण्डारकर ओरियेन्टल इन्स्टीट्यूट, पूना, प्रथमावृत्तिः, सम्वत् १८४६
5. **प्रौढमनोरमा,** भट्टोजिदीक्षितप्रणीता, सम्पा०- डॉ० द्वारिकाप्रसादद्विवेदी, भारतीय विद्या संस्थानम्, वाराणसी, प्रथमं संस्करणम्, २००४
6. **भाषावृत्तिः,** श्रीशचन्द्रचक्रवर्त्तिभट्टाचार्य्येण संस्कृता, सम्पा०- पुरुषोत्तमदेवः, वरेन्द्र रिसर्च सोसायटी, राजशाही, १९१८
7. **लघुशब्देन्दुशेखरः, (षट्टीकोपेतः),** नागेशभट्टविरचितः, सम्पा०- प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २०१३
8. **लघुसिद्धान्तकौमुदी,** वरदराजप्रणीता, गीताप्रेस, गोरखपुर, पुनर्मुद्रितं संस्करणम्, सम्वत् २०७५
9. **वायुपुराणम्,** अनु०- रामप्रतापत्रिपाठी, हिन्दी साहित्य सम्मेलनम्, प्रयागराजः, १९८७
10. **व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः,** आचार्यरामयत्नशुक्लविरचिता, सम्पा०- डॉ० रामनारायणद्विवेदी, लुमिनस् बुक्स, वाराणसी, परिवर्धितं संस्करणम्, २०१९
11. **सारसिद्धान्तकौमुदी,** वरदराजप्रणीता, सम्पा०- जी.वी.देवस्थली, पूना-विश्वविद्यालयः, १९६८
12. **सिद्धान्तकौमुदी, (बालमनोरमा-तत्त्वबोधिनीसहिता),** गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च सम्पादिता, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रितं संस्करणम्, २०१४

❖